# Gangastotram 5

# गङ्गास्तोत्रम् ५

## Document Information

Text title : Gangastotram 5

File name : gangAstotram5.itx

Category : devii, devI, nadI

Location : doc_devii

Author : Shivarama Tripathi

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : December 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2019

*sanskritdocuments.org*

# गङ्गास्तोत्रम् ५

श्रीगणेशाय नमः ।
लोके प्रतिष्ठा भवतो यदेष्टा नेक्ष्या तदा जह्नुनरेन्द्रकन्या ।
नग्नं वृषस्थं पुरुषं विधाय कपालिनं भैक्षचरं करोति ॥ १॥

रजोऽभिभूता रजसा विशुद्धास्तैरेजते जह्नुरेन्द्रकन्ये?
कस्यै न शुद्ध्यै तव पङ्कलेपः कलेवरे कर्मवशात्स्थितानाम् ॥ २॥

मातर्जलस्य प्रकृतिः प्रसिद्धा शीतेति लोके तव तोयसङ्गात् ।
पापं हि जन्तोर्भवति क्षणेन यद्भस्मसात्तन्मम चित्रमास्ते ॥ ३॥

यो विष्णुपादाब्जपरागसङ्गो यश्चापि निर्वाणदपूर्विहारः ।
अघघ्नता या च कलिन्दजाया एतत्वयं त्वत्सखितानिदानम् ॥ ४॥

विधाय सम्भेदमभेदहेतुं सूर्यस्य पुत्र्या सह तीर्थराजे ।
यमाधिकारं नयसि प्रशान्तिं ततोऽपि नीतिज्ञतया नितान्तम् ॥ ५॥

स्तुवन्ति गङ्गे यमकिङ्करास्त्वां
    निन्दन्ति वा स्वाधिकृतेरपायात् ।
जाने न तत्त्वं जननि ! त्वदीयं
    विधेहि मुक्तं किमु संशयेन ॥ ६॥

अधर्मभीरुः श्रितधर्मभीतिः कुर्वन्यथाशक्तिमति स्वधर्मम् ।
तत्त्वावबोधेन विनाऽपि वाञ्छन्मुक्तिं हि सम्भेदमहं स्मरामि ॥ ७॥

सम्भेद एवं मिलिता सरस्वती
    रक्ता मदीया मम शुद्धिहेतवे ।
जाता त्रिवेणी ग्रथनादितः पृथक्
    स्तोतुं कथं याति परं हि मानुषम् ॥ ८॥

गिरेः सकाशादुदयं प्रयातां शितिच्छविच्छादितदिग्विभागाम् ।
यमप्रसक्तोऽपि यमातिभीरुर्नमामि गङ्गां यमुनां स्वमुक्त्यै ॥ ९॥

गौर्याः सपत्नीकविवर्णितां हि
    लक्ष्म्याः सपत्नीमपि सुप्रसिद्धाम् ।
समुद्रयोगेन मिथः सपत्नीं
    नमामि गङ्गां यमुना स्वमुक्त्यै ॥ १०॥

निपीय नीरं तव देवि ! तीरे-
    स्थितः कुटीरे सुलभान्नभोक्ता ।
त्यक्तस्पृहः केवलमोक्षकाङ्क्षी
    ध्वाङ्क्षीव लक्ष्मीनृपतेर्हि तस्य ॥ ११॥

स्मृतिशतपरिगीतांस्त्वद्गुणान्देवि ! शृण्वन्
    विगतशमनभीतिः स्वैरितामभ्युपेतः ।
यदि निरयमवेक्षे क्षीरमासेव्य मातः !
    तव सुरधुनि ! तथ्यं ब्रूहि कस्यापराधः ! ॥ १२॥

इति श्रीशिवराम त्रिपाठी कृतं गङ्गास्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Gangastotram 5*

pdf was typeset on December 7, 2019

Please send corrections to *sanskrit@cheerful.com*